संस्कृत वार्ताः

दिनाङ्क : 05.05.2026 सायम् - 06:20

अथ वार्ताः विस्तरेण

आदौ मुख्यवार्ताः

• विधानसभा-निर्वाचनस्य परिणामानां घोषणानन्तरं पश्चिमबङ्ग, तमिलनाडु, केरलम-प्रदेशेषु च सर्वकारस्य निर्माणार्थं राजनैतिकक्रियाकलापानि आरभन्ते।

• भाजपेति-दलस्य वरिष्ठः नेता अमितशाहः पश्चिमबङ्गालराज्यस्य, केन्द्रीयमन्त्री जे. पी. नड्डाः च असमराज्यस्य केन्द्रीय-पर्यवेक्षकत्वेन नियुक्तौ स्तः।

• बिहारराज्यस्य मन्त्रिमण्डलस्य विस्तारः मई-मासस्य सप्तमे दिनाङ्के भविष्यति; प्रधानमन्त्री नरेन्द्रमोदी च अस्मिन् कार्यक्रमे भागं ग्रहीष्यति।

• प्रधानमन्त्री नरेन्द्रमोदी यू.ए.ई. इत्यस्य फुजैरा-क्षेत्रे आक्रमणस्य निन्दाम् अकरोत् यत्र त्रयः भारतीयनागरिकाः व्रणिताः अभवन्; सम्पूर्णे पश्चिम-एशियादेशे शान्तिं स्थिरतां च पुनः स्थापयितुं संवादस्य कूटनीतेश्च आह्वानमपि सः अकरोत्।

• अमेरिका-इरान्-देशौ गल्फ्-क्षेत्रे नूतनानि आक्रमणानि आरभताम्, यत्र उभौ पक्षौ होर्मुज़्-जलसंधिं नियन्त्रयितुं संघर्षरतौ स्तः।

• आई. पी. एल्. क्रिकेट्-क्रीडायां दिल्ली-कैपिटल्स इति दलं दिल्ली-नगरे चेन्नई-सूपर्-किङ्ग्स् इत्येतं विरुद्ध्य क्रीडिष्यति।

*** ***

राज्यसर्वकाराः

विधानसभानिर्वाचनानां परिणामानां घोषणायाः अनन्तरं तमिलनाडु-केरलम्-राज्ययोः सर्वकारस्य निर्माणार्थं राजनैतिक-प्रक्रियाः आरब्धाः सन्ति। तमिल्नाडु-राज्ये अभिनेतृतः राजनेतारूपेण परिवर्तितः सी. जोसेफ विजयस्य तमिलगा वेट्ट्री कझगम् (टी. वी. के.) इत्यनेन दलेन अष्टोत्तरैकशतासनानि जित्वा राज्ये बृहत्तमदलत्वेन उद्भूतम् अस्ति। दलस्य निर्वाचने प्रबलप्रदर्शनस्य अनन्तरं, नवनिर्वाचिताः टी. वी. केति दलस्य विधायकाः चेन्नई-नगरस्य समीपे पनायूरे दलस्य मुख्यालये उपवेशने श्रीविजयाय औपचारिकरूपेण स्वनेतारूपेण चितवन्तः। पूर्वमुख्यमन्त्री एम.के. स्टालिन् इत्येषः राज्यपालाय स्व त्यागपत्रं समर्पितवान्।

केरल-राज्ये काङ्ग्रेस्-नेतृत्वे यू.डी.एफ्.-दलसमूहः सर्वकार-निर्माणाय अनौपचारिक-चर्चां कुर्वन् अस्ति। केरलस्य चत्वारिंशदधिकैकशत विधानसभा-क्षेत्रेषु द्व्यधिकैकशत-क्षेत्रेषु अद्भुतं विजयं प्राप्य काङ्ग्रेस्-नेतृत्वे यू.डी.एफ्.-दलसमूहः विधायक-दलस्य सभायाः अनन्तरं मन्त्रिमण्डलस्य निर्माणार्थं राज्यपालेन सह मेलनं करिष्यति।

*** ***

अमितशाह-पर्यवेक्षक

भाजपेति दलेन दलस्य वरिष्ठनेता केन्द्रीयमन्त्री च अमितशाहः पश्चिमबङ्गालराज्ये विधायकानाम् उपवेशने विधायकदलप्रमुखस्य निर्वाचनाय केन्द्रीय-पर्यवेक्षकरूपेण नियुक्तः। ओडिशाराज्यस्य मुख्यमन्त्री मोहनचरण माझी राज्यस्य केन्द्रीयसह-पर्यवेक्षकरूपेण नियुक्तः अस्ति। केन्द्रीयमन्त्री जे.पी. नड्डाः असम-राज्ये विधायक-दलस्य नेतृत्व- निर्वाचनाय केन्द्रीय-पर्यवेक्षकरूपेण नियुक्तः अस्ति। हरियाणा-राज्यस्य मुख्यमन्त्री नायब सिङ्घ् सैनी राज्यस्य केन्द्रीय-सह-पर्यवेक्षकरूपेण नियुक्तः अस्ति। एतानि नामानि भाजपा-संसदीय-केन्द्रीय-पर्यवेक्षक-मण्डलेन अनुमोदितानि सन्ति।

बिहार-कैबिनेट्ः

मुख्यमन्त्री सम्राट् चौधरी इत्यस्य नेतृत्वे बिहारराज्यस्य मन्त्रिमण्डलस्य मई मासस्य सप्तमे दिनाङ्के महत्त्वपूर्णः विस्तारः भविष्यति। भाजपेतिदलस्य राज्य-अध्यक्षः सञ्जय् सरावगिः अवदत् यत् शपथग्रहणसमारोहे प्रधानमन्त्री नरेन्द्रमोदी, केन्द्रीय-गृहमन्त्री अमितशाहः, भाजपा-पक्षस्य अध्यक्षः नितिन नबीनः, जनता दल-यू-पक्षस्य अध्यक्षः नितीशकुमारः, एन्.डी.ए-दलसमूहस्य अन्ये वरिष्ठनेतारोऽपि उपस्थिताः भविष्यन्ति।

श्रीसरावगी अवदत् यत् गान्धी-मैदान् इतीदं स्थानं समारोहस्य स्थलरूपेण चितम् अस्ति।

कार्यक्रमस्य सज्जता पूर्वमेव प्रचलिता अस्ति। सहैव गान्धी-मैदान इत्यत्र सार्वजनिकप्रवेशः प्रतिबन्धितः अस्ति।

प्र.म.-यूएई आक्रमणम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना यू.ए.ई.-देशस्य पुजैराह्-क्षेत्रोपरि कृताक्रमणस्य दृढतया निन्दा कृता। सामाजिक-प्रसार-माध्यमे श्रीमोदी अवदत् यत् नागरिकाणां मूलसौकर्याणि लक्ष्यीकृत्य कृताक्रमणात्मकं कार्यम् अस्वीकार्यम् इति। सः दृढीकृतवान् यत् भारतं यू.ए.ई. इत्यनेन सह दृढतया ऐक्यं स्थापयति सहैव हि संवादस्य कूटनीतेश्च माध्यमेन सर्वासां समस्यानां शान्तियुतसमाधानाय स्वसमर्थनं पुनरुद्घाटयतीति। श्रीमोदी अधोरेखितवान् यत् होर्मुज़्-जलसंध्याः माध्यमेन सुरक्षितं निर्विघ्नं च नौचालनं, क्षेत्रीयशान्त्यर्थं, स्थिरतायै, वैश्विक-ऊर्जा-सुरक्षायै च महत्त्वपूर्णम् अस्ति। ईरान्-देशस्य ड्रोन-आक्रमणानन्तरं यू.ए.ई.-देशस्य पुजैराह्-पेट्रोलियम-इण्डस्ट्रीस्-ज़ोन् इत्यत्र अग्निप्रकोपात् ह्यः त्रयः भारतीयाः नागरिकाः व्रणिताः अभवन्। पूर्वं विदेशमन्त्रालयः अपि यू.ए.ई. इत्यत्र आक्रमणस्य निन्दाम् अकरोत्, तत् अस्वीकार्यञ्च इति अवोचत्। मन्त्रालयः एकस्मिन् वक्तव्ये शत्रुतायाः तत्क्षणसमाप्तेः आवाहनम् अकरोत्, नागरिकसंरचनायाः नाशेन सह निष्पापनागरिकाणाञ्च लक्ष्यीकरणस्य निन्दाम् अकरोत्।

अमरीका/होर्मूज़्/ विनाशकारी लक्षणानि

अमरीका-ईरान्-देशौ गल्फ़क्षेत्रे नूतनानि आक्रमणानि अकुरुताम् येन होर्मुज़्-जलसंध्याः नियन्त्रणविषये संकटः वर्धितः, फलतः, सङ्घर्षः जलसंध्याः परं प्रसृतोऽस्ति।

राष्ट्रपति-चड्ढा

भाजपेति दलस्य सांसदाः राघव चड्ढा, अशोक मित्तलः, सन्दीप पाठकः, राजेन्द्रगुप्तः च अद्य राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदी मुर्मु वर्यया सह मिलित्वा पञ्जाब-राज्ये आप-नेतृत्वे प्रशासनेन राज्यतन्त्रस्य कथितस्य दुरुपयोगस्य विषये चिन्तां प्रकटितवन्तः। वार्ताहरैः सह वार्तालापं कुर्वन्, राघव चड्ढा इत्यनेन आप-नेतृत्वे पञ्जाब-सर्वकारः राज्यतन्त्रस्य उपयोगेन राज्यसभायाः सदस्यान् लक्ष्यीकरोति इति आरोपितवान्।

*अत्रान्तरे, पञ्जाब्-राज्यस्य मुख्यमन्त्री भगवन्त-मान इत्येषः अपि आप-दलस्य राज्यसभायाः सप्तसदस्यानां भाजपेति दले प्रवेश-विषये चर्चार्थं राष्ट्रपतिना द्रौपदी-मुर्मु वर्यया सह मिलितवान्। उपवेशनानन्तरम्, श्रीमानः आप-दलस्य सांसदानां विलयनम् असंवैधानिकम् इति उक्तवान्।*

*ऋतु-विभाग*

*भारत-ऋतु-विभागेन आगामि-दिनद्वयोः मध्यप्रदेशे, विदर्भे, छत्तीसगढे च मेघावृष्ट्या, विद्युत्-पतनेन, वायुवेगेन च सह लघुतः मध्यम-वृष्टेः पूर्वानुमानं प्रकटितम्। अद्य उत्तरप्रदेश-झारखण्ड-ओडिशा-छत्तीसगढ-आन्ध्रप्रदेश- मध्यप्रदेश-गाङ्गेय पश्चिमबङ्ग इत्येतेषां च केषुचित् भागेषु अपि एतादृशेः स्थितेः संभावना विद्यते।*

***    ***

*आई. पी. एल.*

*आई. पी. एल. क्रिकेट्-क्रीडायां आतिथेय-दिल्ली-कैपिटल्स दलम् अद्य सायङ्काले अरुण-जेटली-क्रीडाङ्गणे चेन्नई-सुपर-किङ्ग्स इत्येतत् दलं सम्मुखीकरिष्यति। अद्य सायं सार्द्ध सप्तवादने क्रीडा आरभ्यते। गतरात्रौ, वानखेडे-क्रीडाङ्गणे मुम्बई-इण्डियन्स दलेन लखनऊ-सूपर-जायण्ट्स् इत्येतत् दलं षट् स्तोभैः पराजितम्।*

*।। इति वार्ताः।।*